संस्कृतवेदान्त 2476

आत्मज्ञानोपदेशविधिः

४६४/५

शंकराचार्यकृत

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai. "

(1)

॥इति आत्मज्ञानोपदेशप्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

आत्म०

ॐनमःश्रीसच्चिदानंदायपरमात्मनेसद्गुरवे॥ ॥अथात्मज्ञानोपदेशविधिंव्याख्यास्या
१ य मः॥ मुमुक्षवेश्रद्दधानायनयेवीतरागाय आत्मलाभात्परलाभाभावात्। द्रष्टुर्दृश्योन्यइ
य१ तिप्रसिद्धिर्लोके। अथकआत्मेति। देहस्तावदात्मानभवति। रूपादिमत्त्वेनोपलभ्यमान
त्वात् घटादिवत्। यथाघटादयोरूपादिमन्तश्चक्षुरादिकरणैरुपलभ्यन्ते। एवंदेहोपि
रूपादिमांश्चक्षुरादिकरणैरुपलभ्यते। यथादाह्यप्रकाश्यकाष्ठादिव्यतिरिक्तोदाह
कःप्रकाशकोग्निः तथादृश्याद्देहाद्द्रष्टाव्यतिरिक्तआत्मासिद्धः। एतस्मादपिकारणा
देहव्यतिरिक्तआत्मा। स्वापमरणादिदर्शनात् यस्मिन्कालेदेहंसंव्याप्यवर्ततआत्मा ॐ १

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

आत्माकाष्ठाग्निवत्तदादेहोव्यवहारयोग्योभवति।यदादेहादपसर्पतितदादेहःकाष्ठा
दिसदृशोभवति।तस्माद्देहव्यतिरिक्तआत्मासिद्धः।चक्षुरप्यात्मानभवतिरूपग्रह
णसाधनत्वात्प्रदीपवत्।यथाप्रदीपेनकरणेनरूपमुपलभ्यते।तथापिचक्षुषापिक
रणेनरूपमुपलभ्यते।एवमेवइतराण्यपिकरणानि।मनोप्यात्मानभवतिदृश्यत्वात्क
रणत्वाच्चप्रदीपवदेव।बुद्धिरप्यात्मानभवतिदृश्यत्वात्करणत्वाच्चप्रदीपदेव।प्राणो
प्यात्मानभवतिसुषुप्तौचैतन्याभावात्प्राणस्येतरस्मिन्कालेभृत्यस्वामिनोरिवसंकी
र्णयोर्नज्ञायते।कस्येदंचैतन्यमितिसुषुप्तेतुपुनर्विज्ञानरहितःप्राणउपलभ्यते।

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

आत्म०

२

१२

करणोपरमाद्विज्ञानाभावः प्राणस्येतिचेन्न। स्वामिनिव्याप्रियमाणेकरणोपरमाभा
वाद्राजपुरुषवत्। अतएवनंप्राणस्यैतानिकरणानि। यःस्वापेनोपरतस्तस्यैतानिक
रणानि। यदासौबहिर्निर्गम्यकरणान्यधितिष्ठतितदासर्वाणिकरणानिस्वस्ववि
षयेषुप्रवर्तन्ते। यदाजाग्रत्स्थितिनिमित्तंकर्मोद्भूतंभवति। तत्क्षयेसर्वाणिकरणा
निगृहीत्वाबुद्ध्युपाधिसंपर्कजनितंविज्ञानमादायस्वप्नंवागच्छति। एवंस्थानत्रय नविज्ञानत्र
मनवरतंगच्छति। कर्मनिमित्तंचेदंगमनंस्वप्नजागरितेगच्छति। पुनःस्थानद्वयनि
मित्तकर्मोद्भूतंश्रमापनोदायसुषुप्तमपिगच्छति। प्राणोऽपितत्कर्मवशात्तद्देवशरीरं

ॐ

२

(3A)

परिपालयनूवर्तनेस्वप्नसुषुप्तयोर्मूर्तिभ्रांतिपरिहाराय।अहमित्यप्यात्मानभव
ति।सर्वैरात्मत्वेनाभिमतोपिप्रत्यगात्मविवेकरहितैर्दृश्यत्वात्।व्यभिचारात्सुखदुः
खाद्यनेकसंसारधर्मविशिष्टत्वाच्चस्थूलादिधर्मविशिष्टदेहवत्।यद्येवंदेहादिष्व कृशा ३
नात्मत्वात्स्वात्मशंकाकुतइतिचेद्द्रष्टुर्दृश्यविवेकाभावात्। ।इतिप्रथमःखंडः। ।अथ
सआत्माकइति।उक्तेभ्यःसर्वेभ्योंतरतमः।आकाशवत्सर्वगतः।सूक्ष्मोनित्योनिरवयवो
निर्गुणोनिरंजनः।गमनागमनादिक्रियारहितः।अहंकारममकारेच्छाद्वेषप्रयत्नर
हितः।स्वयंज्योतिःस्वभावो।ऽग्न्युष्णवत्सवितृप्रकाशवत्।आकाशादिभूतरहितोबु

(५)

आत्म०

३

ध्यादिकरणरहितः सत्वादिगुणरहितः। प्राणादिवायुभेदरहितः। अशनायापिपासे
शोकमोहजरामरणप्राणबुध्धिशारीरधर्मरहितः। यः सर्वप्राणिहृदिस्थितः सर्वबु
ध्येर्द्रष्टा स आत्मेति। सर्वबुध्धिविशिष्टत्वेनोपलभ्यमानत्वात्सर्वप्राणिहृदिस्थित
इत्युच्यते। न पुनः सर्वगतस्य निरवयवस्यात्मनो बुध्यौरत्वं संभवति। यथाकाश धा ४
स्य न कश्चित्पदार्थाधारो भवति। कथं पुनरहंकारममकारेछाद्वेषप्रयत्नरहितस्या
त्मनो द्रष्टृत्वमित्युच्यते। द्रष्टृत्वं नाम दर्शनक्रियाकर्तृत्वं। यदि दर्शनक्रियां करोति
तिर्हि द्रष्टा तदा अशेषबुध्धिद्रष्टृत्वं नोपपद्यते विरोधात्। यथा देवदत्तस्य क्रमानुरोधे ॐ

३

(6A)

वि

नयुतायुतसिद्धकरणादिसव्यपेक्षयागमनादिक्रियाकर्तृत्वं। नोभयप्रकारकैरण क

संबंधरहितस्याक्रियस्य द्रव्यरूपस्यात्मनो दर्शनादिक्रियास्यात्। यस्य तु पुनः करणा

दिसव्यपेक्षयाद्रष्टृत्वं न स्याल्पविषयद्रष्टृत्वं क्रमद्रष्टृत्वं अद्रष्टृत्वं अन्यथाद्रष्टृत्वं चे

ष्यते। परिणामित्वात्करणादिनिमित्तसव्यपेक्षत्वाच्च चित्तवत्। नैवमात्मनोल्पविष

क्रमद्रष्टृत्व यद्रष्टृत्वमन्यथाद्रष्टृत्वं वेष्यते॥ विक्रियाभावात्। करणादिनिमित्तनिरपेक्षत्वाच्च रत्न

प्रदीपवत्। कथं बुद्ध्यात्मनोः संयोग इत्युच्यते। न पुनरमूर्तयोर्बुद्ध्यात्मनो र्जतु

काष्ठवत्संश्लेषः संभवति अनन्यापेक्षत्वाच्च द्रष्टृत्वमस्य। यथाहंकारममकारेच्छाप्रय

त्वरहितस्यादित्यस्यप्रकाशस्वरूपस्यसंनिधिसत्तामात्रेण। अविक्रियमाणेनप्रका
शेनप्रकाशकत्वमन्यथाप्रकाशकत्वाभावात्तस्यैवंप्रकाशस्वरूपस्यसंनिधि
सत्तामात्रेणवर्तमानस्यादित्यस्यप्रकाशकत्वमध्यारोप्यते। अज्ञैःप्रकाश्याभिव्य
क्त्यपेक्षया। एवमेवसर्वविक्रियाविशेषरहितस्यात्मनोदृग्रूपस्याविक्रियस्यचैतन्य
स्वरूपेणाव्यतिरेकेणसर्वप्रत्ययसाक्षिणोद्रष्टृत्वमुपचर्यतेदृश्याभिव्यक्त्य
पेक्षयाअन्यद्रष्टृत्वाभावात्तस्यकथंसर्वविक्रियाविशेषरहितस्यात्मनःकर्तृत्व
मित्युच्यते। भ्रामकवत्। यथाभ्रामकःस्वरूपसंनिधिसत्तामात्रेणलोहस्यप्रेर

(5A)

कोभवति।एवंमेवसर्वविक्रियाविशेषरहितोप्यात्माकारकावभासकोभवति।तत्र
कारकावभासकत्वंनाम।बुध्यादीनिकरणानिकारकाण्युच्यंते।तानिचैतन्याव
भासितानिस्वस्वविषयेषुप्रवर्तंते।तत्रैवंसतिसर्वविक्रियाविशेषरहितस्यात्मनः
कर्तृत्वमुपचर्यते।यद्यप्येवमात्मानंकथंबुध्याविजानीयादिति।तत्रशक्यतेवक्तुं
बुध्येरवभासकत्वात्।आदित्यज्योतिर्वत्।यथादित्योरूपेणनप्रकाश्यतेतथात्मा
नदृश्यतेबुध्या।एतस्मादप्यात्मानदृश्यतेबुध्या।बुधेर्वेद्यायावेदितृत्वानुपपत्तेः।
यदिअस्याअपिवेद्यायावेदितृत्वंस्यात्तदावेद्यतानस्यात्समत्वात्प्रकाशयोरिव॥ ॥

॥५॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "

इति द्वितीयः खंडः ॥ ॥ तत्रजाग्रत्स्वप्नसुषुप्त्यनुपन्यस्यंते । बुद्धेरवस्था विशेष
णानि । तेषांपरित्यागार्थमात्मविशुद्धिप्रतिपादनाय च । तत्रजाग्रन्नामचक्षुरादी
निकरणानि आदित्याद्यनुग्रहीतानि स्वस्वविषयेषुप्रवर्तंते । तत्रबुद्धिरपिकर
णव्यापारमनुभवति । प्रत्यगात्मचैतन्योज्वलितोभयात्मिका धीर्द्रष्टृदृश्याकाराविव
परिणमते । तत्र प्रत्यगात्मेति कस्मादात्माविशेष्यते । व्यभिचारिणामनात्मत्वख्याप
नार्थं । तत्रबुद्ध्यादीनिकरणानिघटादिवद्दृश्यभूतान्यपिबाह्यापेक्षयातारतम्य
क्रमेणप्रत्यगात्मसंयोगादात्मानोभवंति । उदकस्याग्निसंयोगइवोष्णत्वं । नत्वात्मनस्त

(6A)

संयोगाद नात्मत्वंभवतिउदकसंयोगइवाग्नेरनुष्णत्वं।नत्वात्मनःप्रत्यगात्मत्वंक
दाचिदपिव्यभिचरति।आत्माभ्यंतरेणस्वांतराभावाद्बुध्यादीनामिव।अतएवा
त्माप्रत्यगात्मेतिविशेषणार्हः।एवंचसत्यव्यभिचारितमात्मत्वंस्व्यापिनंभवति।
तत्रप्रत्यगात्मन्चैतन्योज्वलिताधीर्द्रव्याकाराविपरिणमतेतप्तलोहवत्।दृश्याद्यु
परक्तासती।विषयाकारामूषानिषिक्तद्रुतताम्रादिवत्।तत्रैवंसतितदुभयसं
क्षिप्ताःकालाकाशादिवत्सर्गेनास्यनिरवयवस्याविक्रियस्यदृग्रूपस्यात्मनोज्ञा
गरणमिवभवति।अथपुनःसाधीरूपाद्याकारवासनावासितारूपाद्यंतरेण

(७)

आत्म०

६

पुष्पपुटिकेवोभयात्मिका ऽविद्याकामकर्मभिः प्रेर्यमाणा संस्काररूपादृश्यत्वे
नव्यवतिष्ठते तद्दर्शनं स्वप्नइवभवति। तदनुकारित्वादात्मनो जलचंद्रवत्। अथ
पुनः साधीः स्फुरणरहिता वासनारूपेण स्वरूपशून्याइवचैतन्याग्रस्ता सामान्य
रूपेणव्यवतिष्ठते। तत्सुषुप्तं। वटकणिकायामिववटवृक्षः॥ इतितृतीयः खंडः
॥ ॥ तत्रचिन्मात्रस्वरूपएवात्मा कार्यकारणाविद्याकामकर्मनिर्मुक्तः सलिल
वत्स्वच्छः स्वात्मस्थोभवति। एतानिबुद्ध्यवस्थाविशेषणानिनात्मनो ऽविक्रिय
त्वादितानिपरित्यज्यतुरीयआत्मेतिप्रतिपत्तव्यः। तत्रतुरीयत्वंनामसुवर्णघन

ॐ

६

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project

(7 A)

द्विज्ञानघनत्वं। तथापि चैतन्यस्वरूपसंनिधिसत्तामात्रेण साक्षिमात्रत्वं। तत्रस्था
नांतरमात्मत्वप्रतिपत्त्यभावाच्छून्यत्वप्राप्तेः कल्पितानांच निरास्यत्वादनुपप
त्तेः। कथमेतान्यात्मविशुद्धिप्रतिपत्तिहेतूनि येन तेषु सत्स्वात्मविशुद्धिरवगम्यते॥
कथमवगम्यत इत्युच्यते। एतेषु त्रिष्वपि स्थानेषु द्रष्टृत्वाव्यभिचारात्सुषुप्ते व्य
भिचरतीति चेन्न तन्न। तत्रापि दृश्याभावमेव निवारयति सर्वो लोकः। कथं ना
हमत्र सुषुप्ते किंचिदप्युपलब्धवानिति। न दृष्टिं। तस्यास्तर्हि सर्वत्राव्यभिचारा
त्कूटस्थनित्यतासिद्ध्या। अत एव न प्रमाणापेक्षा। असिद्धस्य हि वस्तुनः परि

(8)

आत्म०

७

छित्तिंप्रमाणापेक्षानत्वात्मनः। आत्मनश्चेत्प्रमाणापेक्षयासिद्धिःस्यात्कस्यप्रमा
णापेक्षयासिद्धिःस्यात्कस्यप्रमातृत्वंस्यात्। किंनप्रमातृत्वंस्यात्। यस्यप्रमातृत्वं
सएवात्मेतिनिश्चीयते। नन्वागमेनात्मापरिछिद्यते। न। आगमोप्यात्मान्यध्यारो
पितातद्धर्मनिवर्तकत्वद्वारेणब्रह्मात्मनोरेकत्वप्रतिपत्तिंप्रतिप्रमाणत्वंप्रतिप
द्यते। निर्ज्ञातपदपदार्थद्वयस्यानिर्ज्ञातार्थाभिव्यंजकत्वेननतुफलरूपे। स्वतः
सिद्धत्वादात्मनःसोहमितिस्मृत्याप्रतिसंधानात्। पुण्यापुण्यसंबंधाभावाच्चस्था
नत्रैव्यतिरिक्तत्वंनित्यत्वंशुद्धत्वंबुद्धत्वंमुक्तत्वंअविक्रियत्वंअपरिलुप्तदृग्रूप २७

य

७)

८ स्वस्वंएकत्वंस्वात्मनःस्वानुभवेनैवममुसिध्धमितिजानातिविद्वानाचार्यप्रसादा
दज्ञाननिद्राप्रतिबुध्धःसकलसंसारविनिर्मुक्तोविद्वानेषआत्मज्ञानोपदेशवि
धिः।एवंज्ञात्वाकृतकृत्योभवतिनान्यथेयेवंवेदांतानुशासनंवेदांतानुशासनमि
ति। ।इतिश्रीमसरमहंसपरिव्राजकाचार्यश्रीमद्गोविंदपूज्यपादशिष्यस्यश्रीम
च्छंकरभगवत्पूज्यपादस्यकृतावात्मज्ञानोपदेशविधिः॥ ॥काश्यांश्रीमंगला
गौरीगभस्तीश्वरसंनिधौ॥आलिखीदंप्रकरणमच्युतेनस्वतुष्टये॥१॥शिवोहं
॥ छ ॥ छ ॥ छ ॥ छ ॥ ॐ

८

आत्म०

८

(९)

॥इतिआत्मज्ञानोपदेशसंपूर्णं॥

ॐ

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com